# संस्कृतवार्ता:

**दिनाङ्क :-09.05.2026**

**प्रात: - 06:55**

## अथ वार्ताः

### पश्चिम बंगाल

सुवेन्दु अधिकारी अद्य पश्चिमबङ्गालराज्यस्य प्रथमस्य भाजपेति दलस्य मुख्यमन्त्रीरूपेण शपथ ग्रहणं करिष्यति। कोलकाता-नगरस्य ब्रिगेड परेड-ग्राऊण्ड् इत्यत्र शपथग्रहण-समारोहस्य आयोजनं भविष्यति। प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः, भाजपाध्यक्षः नितिन नबीनः, केन्द्रीयमन्त्रिणः, एन्. डी. ए. शासितानां राज्यानां मुख्यमन्त्रिणः च शपथग्रहणसमारोहे भागं ग्रहीष्यन्ति इत्यपेक्षा अस्ति। पूर्वं ह्यः, श्री अधिकारीवर्यः राज्य-भाजपा-विधायिका-दलस्य नेता निर्वाचितः अभवत्। कोलकातानगरे गृहमन्त्रिणः अमितशाहस्य उपस्थितौ विधायकदलस्य सभा अभवत्। सभायाः अध्यक्षः श्रीशाहः अवदत् यत् सर्वे प्रस्तावाः सुवेन्दु अधिकारिणः पक्षे एव प्राप्तानि। भाजपा-विधायिका-दलस्य नेतृत्वे निर्वाचनानन्तरं, श्री. अधिकारी पश्चिमवङ्गस्य राज्यपालेन आर. एन. रविना सह मिलित्वा राज्ये प्रथमं भाजपा-नेतृत्वस्य सर्वकारस्य निर्माणाय प्रस्ताव: उपस्थापितवान्। विधानसभानिर्वाचने भाजपेति दलेन् ऐतिहासिकं विजयं प्राप्तम्, टी. एम्. सीति दलस्य पञ्चदश-वर्षाणां शासनं च समापितम्।

### पुदुचेरी

पुदुचेरी-राज्ये, राष्ट्रिय-जनतांत्रिक-घटबन्धनस्य मुख्यमन्त्रीपदस्य प्रत्याशि एन्. रंगासामी इत्येषः उपराज्यपालेन के. कैलासनाथन् वर्येण सह मिलित्वा अग्रिमसर्वकारस्य निर्माणाय प्रस्तावः प्रदत्तवान्। श्री. रङ्गासामिः बहुसङ्ख्यायां विधायकानां समर्थनपत्राणि उपराज्यपालाय समर्पितवान्।

### डीआरडीओ

रक्षा-अनुसन्धान-विकास-सङ्घटनेन डीआरडीओ इत्यनेन भारतीय-वायुसेनया च गुरुवासरे ओडिशा-तटस्य समीपे टैक्टिकल्-अड्वान्स्ड्-रेञ्ज्-आग्मेंटेशन् तारेति शस्त्रस्य प्रथमोड्डयन-परीक्षणं सफलतया सम्पादितम्। तारेति भारतस्य प्रथमा स्वदेशीया ग्लाईड-शस्त्र-व्यवस्था अस्ति या मार्ग-निर्देशित-युद्धोपकरणान् यथार्थ-निर्देशित-शस्त्रेषु परिवर्तयति।

### दुबई चालक दल

दुबई-नगरे भारतस्य वाणिज्यदूताबासेन समुद्रे मृतस्य एकस्याः नौकायाः भारतीयस्य चालकदलस्य मृत्योः विषये शोकः प्रकटितः अस्ति। एकस्मिन् सामाजिकान्तर्जालीये पटले, कान्सुलेट-जनरल इत्यनेन घटनैषा दुर्भाग्यपूर्णम् उक्तम्, सः पोतस्य स्वामिना सह निरन्तरं सम्पर्के अस्ति, अधिकविवरणानि च अन्वेष्टुं प्रयासरतः अस्ति। दूतावासेन आश्वस्तिम् यत् अस्मिन् विषये सर्वविध साहाय्यं प्राधान्येन प्रदीयते।

### होर्मुज़्

होर्मुज़्-जलसंध्यां गतिरोधः तदा तीव्रः अभवत् यदा संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि अमेरिका-समर्थितस्य प्रस्तावस्य प्रारूपं इरान्-देशेन निराकृतम्, तत् दोषपूर्णं राजनीतिना प्रेरितं चास्तीति उक्तम्। तेहरानेन उक्तं यत् अयं प्रस्तावः विवादस्य समाधाने साहाय्यं

न कृत्वा अवैधरूपेण कार्यं कर्तुं प्रेरयिष्यति। तेहरानेन संयुक्तराष्ट्रसङ्घस्य सदस्यराष्ट्रान् प्रस्तावितस्य प्रस्तावस्य समर्थनं न कर्तुं प्रार्थितम्।

## आई. पी. एल.

आई. पी. एल. क्रिकेट्-क्रीडायां गतरात्रौ दिल्ल्याः अरुण जेटली-क्रीडाङ्गणे कोलकाता-नाईट-राईडर्स-दलेन दिल्ली- कैपिटल्स दलं अष्ट स्तोभैः पराजितम्। अद्य जयपुरस्य सवाई मानसिंह-क्रीडाङ्गणे राजस्थान-रायल्स्-दलं गुजरात्-टाईटन्स्-दलं सम्मुखीकरिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति।

## संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

**।।इति वार्ता:।।**